# वैदिकर्षीणां परमात्मैकत्वचिन्तनं तद्विमर्शश्च

**डॉ. प्रहलाद सहाय बुनकर**
सह-आचार्य एवं अध्यक्ष
संस्कृत विभाग
राजकीय स्नातकोत्तर महाविद्यालय किशनगढ, अजमेर

भारतवासिनोऽधुनापि वेदवाङ्मये वर्णिताया विचारधारायाः प्रकाशे स्वजीवनोद्देश्यं कर्तव्यपथञ्च सम्यगनुसरन्तो जगति गौरवं भजन्ते। सर्वज्ञानमयं वेदवाङ्मयं समग्रेऽपि विश्ववाङ्मये प्राचीनतममस्ति इत्यत्र नास्त्यधुना विपश्चितां किञ्चिद् वैमत्यम् । वेदज्ञानराशिः तु भारतवर्षस्य सांस्कृतिकनिधिः वर्तते। भारतीयसंस्कृतेः मूलस्तम्भाः विज्ञानं [1] दर्शनं धर्मश्च वेदवाङ्मये प्रतिपादिताः। यदि ज्ञानस्य जिज्ञासा वर्तते तर्हि वेदा एव ज्ञेयाः।[2]

संसारस्य रङ्गमञ्चे प्रकृतिनटी यद्यद् नाट्यं करोति तत्तद् दिव्यं भवति । प्रकृतेः लीलायाः विविधाः पक्षाः सन्ति यथा उषस आगमनं सूर्योदयो मेघगर्जनं झंझावातः वर्षणमित्यादयः। अस्मिन् जगति विविधाः प्राकृतिकशक्तयः सन्ति याः ऋतुसञ्चालनं कुर्वन्ति, संसारं व्यवस्थितं कुर्वन्ति च। एताः विविधशक्तयः विविधाश्च प्रकृतेः पक्षाः एव वेदेषु ऋषिभिः देवरूपेण कल्पिताः।

संसारस्य प्राकृतिकदृश्याणां शक्तीनाञ्चाधिष्ठातारः देवता इति कल्प्यन्ते। यज्ञेषु [3] याभ्यः चरुपुरोडाशसोमादीनां पदार्थानामाहुतयः दीयन्ते होत्रा च या आहूयन्ते ता एताः देवता एव इन्द्रवरुणादयः।

सर्वेषां धर्माणां मूलतवं मनुना वेदे एव प्रतिपादितम् - 'वेदोऽखिलो धर्ममूलम्'।[4] जगति वैदिकदर्शनविचारधारायाः वैशिष्ट्यं स्फुटमवलोक्यते। ऋग्वेदे दर्शनचिन्तनानि मुखरीभूतानि सन्ति।

वैदिकवाङ्मये देवाः महत्त्वपूर्णाः। अत एव ते वेदाध्यायिना सर्वप्रथमं ज्ञेयाः।[5] यास्ककृतनिरुक्तस्य दैवतकाण्डे वैदिकदेवानां विवेचनं वर्तते । निरुक्तकारो यास्काचार्यः देवविषये व्युत्पत्तिलभ्यार्थं प्रकटयति -

**'देवो दानाद्वा। दीपनाद्वा। द्योतनाद्वा।**
**द्युस्थानो भवतीति वा।'[6]**

प्रश्नः समुदेति यत् कियन्तः देवाः सन्ति संसारे? देवतागणनाप्रसङ्गे ऋग्वेदे संख्याभेदः दृश्यते।[7] ऋग्वेदे लोकत्रयानुसारं प्रत्येकं लोकस्य एकादश देवताः वर्णिताः। इत्थं तत्र त्रयस्त्रिंशत् [8] देवताः मन्यन्ते। ऐतरेयब्राह्मणेऽपि त्रयस्त्रिंशद्देवा इति कथितम्-'अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः प्रजापतिश्च वषट्कारश्च'।[9] शतपथब्राह्मणेऽपि देवानां यथावत् गणना क्रियते परं अन्तिमौ द्वौ प्रजापतिरिन्द्रश्च स्तः।[10] अथर्ववेदस्य ब्रह्मचारिसूक्ते देवानां त्रयस्त्रिंशत् त्रिशता, षट्सहस्रञ्चापि संख्याः प्रदीयन्ते।[11] ऋग्वेदशतपथब्राह्मणयोः देवतानां एकोनचत्वारिंशदधिकत्रिशताधिकत्रिसहस्र संख्या प्रोक्तास्ति।[12] यजुर्वेदेऽ पि त्रयस्त्रिंशत् देवाः परिगणिता वर्तन्ते।[13]

पण्डितमधूसूदनओझामहोदयः 'अग्निसोमात्मकं जगदिति[14] कथयित्वा विषयेऽस्मिन् वर्णनं करोति यत् इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इत्यष्टौ देवता क्षत्रियाणि । क्षत्रवीर्यप्रदानव्रतैरेतैर्देवैः संस्कृतात्मा क्षत्रियो भवति ।[15]

विषयेऽस्मिन् निरुक्तकारः यास्काचार्यः निरुक्ते सप्तमाध्याये दैवतकाण्डे कथयति-तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानः। वायुर्वेन्द्रो वान्तरिक्षस्थानः,सूर्यो द्युस्थानः।।[16] अथर्ववेदेऽपि वर्णितमस्ति - 'ये देवा दिविषदो अन्तरिक्षसदश्च ये चेमे भूम्यामधि।'[17]

तदा पुनः वरुणोऽयं मित्रोऽयं मरुदयं सवितायं पूषायं विष्णुरयं रुद्रोऽयं सोमोऽयं पर्जन्योऽयं प्रजापतिरयं बृहस्पति-रयमित्यादिप्रकारेण नानादेवानां वर्णनं वैदिकवाङ्मये कथमुपलभ्यते।

वेदवाङ्मयमनादि अपौरुषेयञ्च[18] मन्यते । वेदाः भारतीयपरम्परागतमतानुसारेण तु स्वयं साक्षात् परमेश्वराद् पुरूषादुद्भूताः। अत एव वेदस्याधारभूताः विभिन्नाः देवताः प्राकृतिकशक्तीनां प्रतीकीभूताः।

बहुदेववादिन ईश्वरं सृष्टिकर्त्तारं नियामकं प्रलयकारिणमेकञ्च मन्यन्ते । एतदतिरिक्तमन्याः देवताः भूतानि प्रेताः वृक्षपर्वतमेघमृतात्मादयश्च ते देवान् मत्वा तानुपास्यान् स्वीकुर्वते । परमेकेश्वरवादिनः एकमेवेश्वरमुपास्यं मत्वान्यान् वाय्वग्न्यादिकान् काल्पनिकदेवान् प्रकृतेः विकारान् मन्यन्ते ।

यतो हि एताः अचेतनशक्तयः परमात्मनः प्रेरणाशक्त्या विभिन्नेषु प्राकृतिककार्येषु परिणता भवन्ति ।[19]

ऋग्वेदे बहुदेववादस्य विचारधारा वास्तविकी परमार्थतो नास्ति । पुरुषसूक्तं स्फुटरूपेण एकेश्वरवादं प्रमाणी-करोति -

**पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।**
**उतामृतत्वस्येशानो यदन्नेनातिरोहति।।**[20]

वैदिकमुनीनां मतौ विराट् पुरुष एवास्ति आदिशक्तिमान् परमेश्वरः। स एव सर्वोपरि सत्तास्ति, यः चराचरेषु व्यापनाद् व्याप्नोति । स एव विश्वस्यात्मास्ति। अत एव स परमात्मेति बोध्यः। स एव विश्वस्य सञ्चालनं करोति। स एव एकाधिष्ठाने तिष्ठन्नपि सर्वत्र विद्यमानोऽस्ति। इदं सर्वं तस्यैव रूपमस्ति। स एव देवानामधिदेवोऽस्ति । स एव ऋत सञ्चालनं करोति। संसारस्योत्पत्तिः ऋग्वेदानुसारमृतादेवाभवत्।[21] अपि च हिरण्यगर्भसूक्ते एकाधिदेवमधिकृत्य ऋषिणा प्रोक्तम् -

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।**[22]

यजुर्वेदोप्याह शिवसंकल्पसूक्ते -

**'ज्योतिषां ज्योतिरेकम्'**

ऋग्वेदस्य तृतीयमण्डले पञ्चपञ्चाशत्तमे सूक्ते द्वाविंशेषु मन्त्रेषु विभिन्नदेवानां रूपेषु एक एव अदृष्टशक्तेः विततिरस्ति-'महद्देवानामसुरत्वमेकम्[23]'

नासदीयसूक्तमपि एकेश्वरवादं प्रतिपादयत्यधोलिखितमन्त्रेण-

**इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा दधे न ।**
**योऽस्याध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदि वा न वेद ।।**[24]

परमकारुणिकपरमेश्वरस्य विषये यजुर्वेदे वर्णितमस्ति -

**'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।**
**कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यःसमाभ्यः।।'**[25]

शुक्लयजुर्वेदे परमात्मा सर्वेषु चराचरेषु व्याप्नोति। एक एवेश्वरशक्तिर्विविधैः पदैरुपस्थाप्यते यजुषा-

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमा ।**
**तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।।**[26]

वेदभाष्यकारः सायणाचार्यः कथयति - 'तस्मात् सर्वैरपि परमेश्वर एव हूयते ।'

शुक्लयजुर्वेदवचसि सोऽसौ परमात्माणुमात्रेषु परमाणुमात्रेषु च व्याप्तिं लभमानो वर्तते।-

'ईशावास्यमिदं सवं यत्किञ्च जगत्यां जगत्'[27] ऐतरेयब्राह्मणेऽपि च विभिन्नानां देवानां रूपेषु एक एव परमेश्वरोऽनेकैः नामभिः प्रपञ्चत्वं लभत इत्याख्यातमस्ति।[28]

वेदवाङ्मयस्य मूर्धन्यव्याख्यात्रा स्वामिदयानन्दमहोदयेन स्वग्रन्थस्य सत्यार्थप्रकाशस्य प्रथमसमुल्लासे एकस्यैव परमात्मनः शक्तिवैचित्र्याच्छताधिकानि नामानि प्रस्तुतानि । तैत्तिरीयोपनिषदनुसारम्-यतो वाइ मानि भूतानि जायन्ते, येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति, तद् ब्रह्मेति।[29]

श्वेताश्वतरोपनिषदनुसारं यत्-

ऐको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।।[30] निरुक्ते एकेश्वरवादस्य वर्णनं कुर्वन् यास्को ब्रूते- तासां महाभाग्यादेकैकस्यापि बहूनि नामधेयानि भवन्ति । अपि वा कर्मपृथक्त्वात्।[31] पण्डितमधुसूदनौझामहोदयः कथयतियत् यदुद्देशेन किञ्चित्क्रियते तत्र कर्मणि सा देवता, यदुद्देशेन किञ्चिदुच्यते तत्र वाक्ये सा देवता। मन्त्रांश्च द्रष्टृणां वाक्यानि भवन्ति ।[32] महाभाग्यादैश्वर्ययोगादेकात्मनामनेकधा विकुर्वन्तीनामेकैकस्याः प्रतिविकारं जातवेदा वैश्वानरो वरुणो रुद्रोऽश्विनौ उषा इत्येवमादीनि बहूनि नामधेयानि भवन्ति ।[33]

एतदेवाधिकृत्य ऋषिणा ऋग्वेदे प्रोक्तम् -

**'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यःस सुपर्णो गरुत्मान् ।**
**एकं सद्विप्राः बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहु।।'**[34]

मन्त्रेऽस्मिन् प्रकृष्टरूपेण एकेश्वरवादस्य प्रतिष्ठास्ति। सत्तत्वमेकमेवास्ति परं तद्विद्वांसो ब्राह्मणा अनेकरूपाश्रितमाहुः।[35] अत्रेदमवधेयं यदादौ विदुषां बहुदेववादः सुमत आसीत् परमनन्तरं दार्शनिकमतप्रवृद्धमतयो विपश्चितस्तदेकं नित्यं सत्तत्वं मन्वानास्तस्यैव सकलं विवर्त इति प्रतिपादयामासुः। [36]

देवतावादं ब्रह्ममूलकं प्रतिपादयतां श्रीमतां दामोदरसातवलेकरमहोदयानां मतौ यथैकपुरुष पितृभ्रात्रादिगुणबोधकैः शब्दैः सम्बोध्यतेऽथ चानेकैरेभिः शब्दैः तस्यैवैकस्यैव पुरुषस्य बोधः भवति तथैव अग्निरुणाद्यनेकैः शब्दैरेकस्यैव परमात्मनः बोधो भवति ।[37] एको मनुष्यः यथा विभिन्नानि सम्बोधनानि गृह्णाति तथैव एकस्य परमात्मनःबहूनि नामधेयानि भवन्ति । तस्मात् भिन्नानां नाम्नां भ्रमेण अनेकदेवतावादो युक्तियुक्तः इति कदापि नैव बोध्यः। सारतः अधिदेवेतरदेवा अधिदेवस्यैव प्रत्यङ्.गानि इति वेत्तुं शक्यते । निरुक्तेऽपि च-

महाभाग्यात् देवताया एक एव आत्मा बहुधा स्तूयते। एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति।[38] तदेवं सिध्यति यदिदं देवानां वस्तुतो माहात्म्यमेव वर्ण्यते । यथार्थतस्तु तद्विभाजनं बाह्यमेवास्ति। अन्तरङ्गभूतोऽधिदेवतात्मा तु न कदापि भेदमश्नुते। तस्मात् सर्वेष्वप्येषु देवेषु समाना गुणा भवन्ति। तद्यथा सर्वेऽपि देवाः बुद्धिमन्तः द्युतिमन्तः प्राणवन्तः चरित्रवन्तः यज्ञियाः अनुग्रहशीलाः दानशीलाः परोपकारिणः सत्यवादिनः ऋतज्ञा अमृताः सहृदयाः सर्वोत्कृष्टाः निश्चलाः पवित्रा सर्वज्ञत्वादिगुणैरलंकृताश्च विद्यन्ते। तद्यथा निरुक्ते -

**इतरेतरजन्मानो भवन्ति । इतरेतर प्रकृतयः ।**[39]

इत्थं वर्णन विषेशकाले वर्णितः देवः इतरदेवानां योनिः भवति यथा - अग्निर्वै देवयोनिः' अग्निर्वै देवानां नेदिष्ठः। अग्निर्वै देवानां वशिष्ठः। सविता वै प्रसवानामीशः। आपो वै सर्वाः देवताः। अत एव सर्वे देवाः स्तुतिकाले स्वमाहात्म्येन सर्वोत्कृष्टरूपेण वर्णिताः। अस्मात् कारणात् दयानन्दादयः वेदबुधाः 'देव' शब्दस्य 'परमात्मा' एव शब्दार्थं प्रस्तुतं कुर्वन्ति ।[40]

शतपथब्राह्मणं विविधतायां यदैक्यमस्ति तमात्मानं प्रतिपादयति -

**'अत्र ह्येते सर्व एकं भवन्ति तदेतत् पदनीयं सर्वस्य यदयमात्मा।'**[41]

**देवस्य ऐश्वर्यप्रदातृत्वात् देवत्वमिति दुर्गमतम् देवो ददाति ह्यसौ ऐश्वर्याणि।**[42]

सर्वाः देवता प्रकृतेः विभिन्नानि स्वरूपाणि सन्ति । इदं जगत् विभिन्नानां देवानां क्रीडानिकेतनमस्ति। वैदिक कार्याणां विश्वासोऽयमासीत् यत् एतेषां देवानामनुग्रहेणै सकलानि कार्यजातानि सञ्चालितानि भवन्ति । वैदिकदेवाः महिमाशालिनः सन्ति। तेषां देवानां महिम्ना एव विविधत्वं जायते । वैदिकधर्मस्य विशिष्टता इयं यत् यस्मिन् काले यो देवः स्तूयते तस्मिन् काले स एव सर्वोत्कृष्टः कथ्यतेऽर्थपतित्वात्[43] -

**ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्देवतः स मन्त्रो भवति ।**[44]

देवताशब्दं व्याख्यायमानः स्वामिदयानन्दः स्फुटरूपेण एकेश्वरवादस्यैव प्रतिपादनं करोति ।

श्रीमान् मैक्डॉनल महोदयोऽपि देवमीश्वरं ज्ञात्वा कस्यचनैकस्याद्भुतस्य देवनगरस्य कल्पनां कुरुते ।

तद्वर्णनानुसारं सूर्यदेवस्य रथं सप्ताश्वाः कर्षन्ति । देव्युषा कदाचन सूर्यस्य पत्नीत्वेन वर्ण्यते कदाचन च तस्य मातृत्वेन वर्ण्यते । मेक्डोनलः उषसं प्रत्येकं देवस्य प्राणदायिनीमाह[45]।

एतद्विधैः सम्भ्रान्तवर्णनैः अमी विद्वांसः वैदिकदेवान् ग्रीकगाथाशास्त्रस्य 'अपोलो'- आदिभिः देवैः सम्मेल्य वैदिकगाथाशास्त्रं प्रबलं कर्तुमीहमानाः एकस्य नूतनस्य तुलनात्मकस्य च गााथाशास्त्रस्य सर्जनं कुर्वन्ति।[46]

ग्रीकरोमयोः बहुदेवतायाः अर्थस्तु एकस्य परदेवस्याध्यक्ष्ये ध्वनीनामनेकासां देवतानां वासः इत्याह । इयं मान्यता वैदिकदेववादस्य प्रतिकूला मान्यतास्ति।

मैक्समूलरमहोदयः वैदिकैकेश्वरवादं 'हीनोथिज्म' इति उक्तवान्। तस्मात् मैक्समूलरः त्रयस्त्रिंशत् देवतानामुपासनामाह । परं सः एतं बहुदेवतावादं न मनुते। तद्वचनानुसारं तु वैदिकर्षयः प्रत्येकं देवं परमदेवं मत्वाऽपूजयन्।[47]

परं महर्षिर्दयानन्दः तां मान्यतां काल्पनिकीं मत्वा तां निरस्यन् ब्रूते यत् देवताशब्देन यः ईश्वरं गृहणन्ति, ते सत्यं न जानन्ति ।[48]

पौराणिकसाहित्यस्य कारणात् प्रमुखतः वैदिको बहुदेववादः आकारं प्रकारं वाप्तवान्। अस्मादेव हेतोः भारतीयसमाजे शैवशाक्तवैष्णवाद्या विविधाः सम्प्रदायाः जनिं लेभिरे। त इमे सम्प्रदायाः परवर्तिभिः बहुदेववादिभिः सम्प्रसारिताः।[49]

मैक्समूलरादयो पाश्चात्यविद्वांसः वैदिकदेवतावादे बहुदेववादस्य यदारोपणं कुर्वन्ति तन्मूले पौराणिककालात् प्रचलितस्य बहुदेववादस्य प्रभाव एव परिलक्ष्यते।[50] विषयेऽस्मिन् स्वामिदयानन्दस्य समक्षेऽप्ययं प्रश्नः समुदित आसीत् स्वीयां दिव्यदृष्टिं वेदप्रामाण्यं चाधारीकृत्य स महर्षिरेकेश्वरवादं प्रसारितवान् बहुदेववादं च सप्रमाणं खण्डितवान् । तस्मात् हीनोथिज्मपदेन पौराणिकदेववादस्तु कथमपि संकेतयितुं नार्हति । श्रीमद्भागवतेऽपि एकेश्वरवादस्य प्रबलः पक्षपातः दृश्यते -

**अहं सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।**
**हित्वार्चां भजते मौढ्यात् भस्मन्येव दृ जुहोति सः ।।**[51]

शतपथब्राह्मणमपि एकं ब्रह्म परित्यज्य पार्थिवानामन्येषां देवानां पूजाः कुर्वतः मर्त्यान् ब्रूते - योऽन्यां देवातामुपास्ते न स वेद यथा पशुरेव स देवानाम् ।[52]

अतएव स्पष्टमिदं यत् आत्मा स्वस्मात्  स्वयमेव जायते सारतः देवा आत्मजन्माः। आत्मैवैषा रथो भवति आत्मा एवः आत्मायुधम् आत्मेषवः। आत्मा सर्वदेवस्य । [53] अन्येषां पाश्चात्यानां मतौ वेदेषुप्रथमकाले बहुदेववादः आसीत् तदनन्तरमेकेश्वरवादस्य कल्पना समक्षमागता ततः परं सर्वेश्वरवादः। देवानामेष उत्पत्तिविकासक्रमश्च निराधारः प्रतीयते यतोऽथर्ववेद एव स्पष्टरूपेणोद्घोषितं यत् - ईश्वरः एकः सोऽद्वितीयः सोऽद्वैतः अथर्ववेदे परमेश्वरस्यानेकत्वं प्रत्याख्याय तस्य द्वितीयत्वं तृतीयत्वं चतुर्थत्वं पञ्चमत्वं षष्ठत्वं सप्तमत्वमष्टमत्वं नवमत्वं दशमत्वादिकं च निषेधयति त च  सजातीयविजातीयस्वगतभेदशून्यं  प्रतिपादयति।[54]

दयानन्दस्य वाण्यां वेदे क्वचिदपि बहुवादस्य सफुटतराभिव्यक्तिर्नावलोक्यते परमेकेश्वरवादस्तु स्फुटतरैः शब्दैः बहुत्र मुखरीभूतो दृष्टिपथमागच्छति ।[55]

महर्षिर्दयानन्दः एकेश्वरवादं प्रबलैः शब्दैः पुष्णाति । तन्मतानुसारं यस्मात्  वैविध्यपूर्णा सृष्टिरियं सृष्टिमापादिता, यो धारणप्रलयौ विदधति, यस्मिन् व्यापके जगदीश्वरे जगदिदमुत्पत्तिस्थितिप्रलयानाप्नोति, सः परमेश्वरः एको नित्यः सनातनोऽस्ति।[56]

इदमेव कारणं यत् दयानन्दादयः[57] विद्वांसः वेदानामाध्यात्मिकमर्थं कुर्वाणाः देवशब्दस्य परमात्मा इत्येवार्थं गृह्णन्ति। निष्कर्षे कथयितुं शक्यते यत् वैदिकविचारानुसारेण संसारस्य एका शक्तिःभवति । सा एव तस्य नियामिकास्ति।  एते देवाः तस्या प्रतिनिधित्वं कुर्वन्ति । वेदेषु एकेश्वरवादः प्रतिपादितः देवत्वेन । अनेकेषु सूक्तेषु कथितमस्ति यत् अन्येषां देवानां स्थितिः केवलमेकाधिदेवस्य महिम्नोऽङ्.गरूपेण वर्तते । तदेवमेकेश्वरवादो वैदिकेश्वरवादस्य याथातथ्यम् । 'यो देवेष्वधिदेव एक एवासीत्' इति रूपे एकाधिदेवः जगतः संचालकः नियामकश्चास्ति । अन्येषां देवानां स्थितिः परमात्मनोऽङ्गानि प्रकटयति, अत एव वेदवाङ्मये एकेश्वरवादस्य विचारधारा वास्तविकी कथयितुं शक्यते एकं सद्विप्राः बहुधा वदन्तीति वेदवाक्यस्येदमेव याथार्थ्यमस्ति।

## सन्दर्भाः

1 एकस्माद् अनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्या तथा अनेकस्मादेकस्मिन्नारोहणज्ञानं ब्रह्मविद्या - महर्षिकुलवैभवम,उपोद्धात पृ.3

2 'निः सृतं सर्वस्मात् तु वेदशस्त्रात् ' अत्रिं

3 'वाचश्चित्रस्योत्तरोत्तरितक्रमो यद् यज्ञः ,- ऐतरेय आ 2.3.3.15

4 मनुस्मृतिः,2.6

5 वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः । दैवतज्ञो हि मन्त्राणां तदर्थमधिगच्छति।। न हि कश्चिदविज्ञाय याथातथ्येन दैवतम् लौकिकानां वैदिकानां कर्म्माणि फलमश्नुते।। तत्र तत्र यथावच्च मन्त्रान् कर्म्मसु समुद्ध्य्रते ।। - आचार्य षौनक , वृहद्देवता , 1.2.4.5

6 यास्क , निरुक्त 7.4

7 ऋग्वेद 1.41.1- मित्रो वरुणोऽर्य्यमेति त्रयः प्रचेतसो देवाः

ऋग्वेद 1.139.19 ,8.28.1 ।- त्रयस्त्रिंशद्देवाः ।

ऋग्वेद 3.9.9- त्रीणि शतात्रिसहस्त्राण्यशग्निं त्रिंश्च्चदेवा नव चासपर्यन् ।,

8 ऋग्वेदः 8.28.1( 1. 39.19 ) ये त्रिंशति त्रयःपरो देवासो बर्हि रासद

9 ऐतरेयब्राहाण, 1.1.1

10 त्रयस्त्रिशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एक त्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशविति। शतपथ ब्राह्मण 11.6.3.5.,

11 यस्य त्रयस्त्रिंशद् देवा अङ्गेनात्र विभेजिरे। तान् वै त्रयस्त्रिशद् देवानेते ब्रह्मविदो विदुः।। - अथर्व वेदः10.7.27.

12 त्रीणि शता त्रिसहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् - ऋग्वेदः 3.9.9.

कतिदेवा याज्ञवल्क्येति त्रयश्च त्रींश्च शता त्रयश्च त्रींच सहस्रेत्योमिति । शतपथब्राहण , 11.6.3.4

13 त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ,- यजुर्वेदः, 14.31

14 पण्डितधुसूदन ओझा विरचित देवतानिवित्,पृष्ठ 1

15 देवतानिवित्, पृष्ठ .3

16 यासक, निरुक्त 7.2

17 अथर्ववेदः, 10.9.12

18 ऋग्वेदः पुरुषसूक्त , 10.90

19 वैदिक एकेश्वरवाद ( शोध लेख-डॉ.कर्णसिंह )

वैदिक चिन्तन , डॉ.रधुवीर वेदालंकार , पृ. 19

20 ऋग्वेदः, 10.90.2

21 ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।ऋ 10.190.1.

22 ऋग्वेदः10.121.1

23 ऋग्वेदः3.55.1-22

24 ऋग्वेदः10.12.9.6

25 यजुर्वेदः,अध्याय40,मंत्र.8

26 यजुर्वेदः,40.1

27 यजुर्वेदः,32.1

28 ऐतरेयब्राह्मण, 3.2.3.12

29 तैत्तिरीयोपनिषद्, 3.1

30 श्वेताश्वतरोपनिषद,6.11

31 यास्क,निरुक्त , 7.2

32 आधिदैविकाध्याय,देवताधिकार, पृष्ठ 3

33 निरुक्त दुर्गभाष्य, 7.2

34 ऋग्वेद 1.764.46

35 तुलनीय- इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मान्।'निरुक्त 7.5

36 ऋग्वेदः, 8.58.2- एक एवाग्निर्बहुधा समिद्धः एकः सूर्यो विश्वमनु प्रभूतः। एकैवोषा सर्वमिदं विभाति एकं वा इदं विबभूव सर्वम् ।।

37 वैदिकचिन्तन, पृष्ठ 193 ;वैदिक एकेश्वरवाद, शोधलेख

38 निरुक्त,7.1

39 निरुक्त,7.1

40 सत्यार्थप्रकाश , सप्तम समुल्लास, ईश्वरवेद विषय

41 शतपथ ब्राह्मण, 14.4.2.18

42 निरुक्तम दुर्गभाष्य , 7.4

43 अमुष्या देवतायाः प्रसादेनअहममुष्यार्थस्य पतिर्भविष्यामीत्येता बुद्धिः पुरोधाय । - निरुक्त दुर्गभाष्य 7.1

44 निरुक्त, 7.1

45 See - A Vedic Reader for Students, Page 92
By - AA Macdonell, Reprint 1954

46 दयानन्द दर्शन ( डॉ वेदप्रकाश गुप्त ) पृ. 27

47 Max Muller, 'Indian what can it teach us' Page 146-247, 1879

48 सत्यार्थप्रकाश पृ.175 दयानन्द दर्शन पृ.27

49 वैदिक चिन्तन ; शोध लेख पृष्ठ -191

50 डॉवेदप्रकाश गुप्त, दयानन्द दर्शन , पृ. 110

51 श्री मद्भागवत, 3.2.9.21.22

52 शतपथब्राह्मण, 14.4.2.कण्डिका 19,22

53 निरुक्त ,7.1

54 न द्वितीयो न तृतीयश्चतुर्थोनाप्युच्यते

न पंचमो न षष्ठः सप्तमो नाप्युच्यते

नाष्टमो न नवमो दशमो नाप्युच्यते

स एष एक वैकः ।। - अथर्ववेद , 13.4

55 सत्यार्थप्रकाश , पृ . 174

56 सत्यार्थप्रकाश , पृ.2 08 दयानन्ददर्शन, पृ.11.

57 एकोऽपि वेदविद् धर्म्यं व्यवस्येत् सः विज्ञेयः परो धर्मः मनुस्मृति- 12. 113